श्री कामाक्षी स्तुतिः

श्री कामाक्षी स्तुतिः

वंदे कामाक्ष्यहं त्वां वरतनुलतिकां विश्वरक्षैकदीक्षां
विष्वग्विश्वंभरायामुपगतवसतिं विश्रुतामिष्टदात्रीं |
वामोरूमाश्रितार्तिप्रशमननिपुणां वीर्यशौर्याद्युपेतां
वंदारुस्वस्वर्द्रुमिंद्राद्युपगतविटपां विश्वलोकालवालां ||1||

चापल्यादियमभ्रगा तटिदहो किंचेत्सदा सर्वगा-
ह्यज्ञानाख्यमुदग्रमंधतमसं निर्णुद्य निस्तंद्रिता |
सर्वार्थावलिदर्शिका च जलदज्योतिर्न चैषा तथा
यामेवं विवदंति वीक्ष्य विबुधाः कामाक्षि नः पाहि सा ||2||

दोषोत्सृष्टवपुः कलां च सकलां बिभ्रत्यलं संततं
दूरत्यक्तकलंकिका जलजनुर्गंधस्य दूरस्थिता |
ज्योत्स्नातो ह्युपरागबंधरहिता नित्यं तमोघ्ना स्थिरा
कामाक्षीति सुचंद्रिकातिशयता सा पातु नः सर्वदा ||3||

दिश्याद्देवि सदा त्वदंघ्रिकमलद्वंद्वं श्रितालिष्वलं
वृत्तिं तत्स्वयमादधच्च विमुखं दोषाकराडंबरे |
सूर्यादर्शहसन्मुखं श्रुतिपथस्यात्यंतभूषायितं
नेत्रानंदविधायि पंकमधरीकृत्योज्ज्वलं सद्धृतं ||4||

कामाक्षीपदपद्मयुग्ममनघं कुर्यान्मदीये मनः-
कासारे वसतिं सदापि सुमनस्संदोहसंराजिते |
सुज्ञानामृतपूरिते कलुषताहीने च पद्मालये
नित्यं सत्कुमुदाश्रिते निजवसत्यात्तप्रभावे सदा ||5||

कामक्षीपदपद्मयुग्मनखराः सम्यक्कलासंयुताः
नित्यं सद्गुणसंश्रिताः कुवलयामोदोद्भवाधायकाः |
उत्कोचं दधतश्च पंकजनुषां संरोचकाः स्थानतः
श्रेष्ठादिंदुनिरासकारिविभवा रक्षंतु नः सर्वदा ||6||

कामाक्षीचरणारविंदयुगलीगुल्फद्वयं रक्षता-
दस्मान् संततमाश्रितार्तिशमनं दोषौघविध्वंसनं |
तेजःपूरनिधानमंघ्रिवलयाद्याकल्पसंघट्टन-
प्रोद्यद्ध्वानमिषेण च प्रतिश्रृणन्नम्रालिरक्षामिव ||7||

जंघे द्वे भवतां जगत्त्रयनुते नित्यं त्वदीये मन-
स्संतोषाय ममामितोर्जितयशःसंपत्तये च स्वयं |
साम्योलंघनजांघिके सुवपुषा वृत्ते प्रभासंयुते
हे कामाक्षि समुन्नते त्रिभुवनीसंक्रांतियोग्ये वरे ||8||

कामाक्ष्यन्वहमेधमानमवताज्जानुद्वयं मां तव
प्रख्यातारिपराभवैकनिरति प्रद्योतनाभं द्युतेः |
सम्यग्वृत्तमतीव सुंदरमिदं संपन्निदानं सतां
लोकप्राभवशंसि सर्वशुभदं जंघाद्वयोत्तंभनं ||9||

ऊरू ते भवतां मुदे मम सदा कामाक्षि भो देवते
रंभाटोपविमर्दनैकनिपुणे नीलोत्पलाभे शुभे |
शुंडादंडनिभे त्रिलोकविजयस्तंभौ शुचित्वार्जव-
श्रीयुक्ते च नितंबभारभरणैकाग्रप्रयत्ने सदा ||10||

कामाक्ष्यन्वहमिंधतां निगनिगप्रद्योतमानं परं
श्रीमद्दर्पणदर्पहारि जघनद्वंद्वं महत्तावकम |
यत्रेयं प्रतिबिंबिता त्रिजगती सृष्टेव भूयस्त्वया
लीलार्थं प्रतिभाति सागरवनग्रावादिकार्धावृता ||11||

बोभूतां यशसे ममांब रुचिरौ भूलोकसंचारतः
श्रांतौ स्थूलतरौ तवातिमृदुलौ स्निग्धौ नितंबौ शुभौ |
गांगेयोन्नतसैकतस्थलकचग्राहिस्वरूपौ गुण-
श्लाघ्यौ गौरवशोभिनौ सुविपुलौ कामाक्षि भो देवते ||12||

कामाक्ष्यद्य सुरक्षतात् कटितटी तावक्यतीवोज्ज्वल-
द्रत्नालंकृतहाटकाढ्यरशनासंबद्धघंटारवा |
तत्रत्येंदुमणींद्रनीलगरुडप्रख्योपलज्योतिषा
व्याप्ता वासवकार्मुकद्युतिखनीवाभाति या सर्वदा ||13||

वस्तिः स्वस्तिगता तवातिरुचिरा कामाक्षि भो देवते
संतोषं विदधातु संततमसौ पीतांबराष्टिता |
तत्रापि स्वकया श्रिया तत इतः प्रद्योतयंती दिशः
कांतेंद्रोपलकांतिपुंजकणिकेवाभाति या सौष्ठवात् ||14||

यन्नाभीसरसी भवाभिधमरुक्षोणीनिविष्टोद्भव-
त्तृष्णार्ताखिलदेहिनामनुकलं सुज्ञानतोयं वरं |
दत्वा देवि सुगंधि सद्गुणसदासेव्यं प्रणुद्य श्रमं
संतोषाय च बोभवीतु महिते कामाक्षि भो देवते ||15||

यन्मध्यं तव देवि सूक्ष्ममतुलं लावण्यमूलं नभः-
प्रख्यं दुष्टनिरीक्षणप्रसरणश्रांत्यापनुत्त्या इव |
जातं लोचनदूरगं तदवतात् कामाक्षि सिंहांतर-
स्वैराटोपनिरासकारि विमलज्योतिर्मयं प्रत्यहं ||16||

धृत्यै ते कुचयोर्वलित्रयमिषात् सौवर्णदामत्रयी-
बद्धं मध्यमनुत्तमं सुदृढयोर्गुर्वोर्ययोर्दैवते |
सौवर्णौ कलशाविवाद्य च पयःपूरीकृतौ सत्कृतौ
तौ कामाक्षि मुदं सदा वितनुतां भारं पराकृत्य नः ||17||

पाणी ते शरणागताभिलषितश्रेयःप्रदानोद्यतौ
सौभाग्याधिकशंसिशास्त्रविहरद्रेखांकितौ शौभनौ |
स्वर्लोकद्रुमपंचकं वितरणे तत्ततृषां तस्य त-
त्पात्रालाभविशंकयांगुलिमिषान्मन्ये विभात्यत्र हि ||18||

दत्तां देवि करौ तवातिमृदुलौ कामाक्षि संपत्करौ
सद्रत्नांचितकंकणादिभिरलं सौवर्णकैर्भूषितौ |
नित्यं संपदमत्र मे भवभयप्रध्वंसनैकोत्सुकौ
संरक्तौ च रसालपल्लवतिरस्कारं गतौ सुंदरौ ||19||

भूयास्तां भुजगाधिपाविव मुदे बाहू सदा मांसलौ
कामाक्ष्युज्ज्वलनूत्नरत्नखचितस्वर्णांगदालंकृतौ |
भावत्कौ मम देवि सुंदरतरौ दूरीकृतद्वेषण-
प्रोद्यद्बाहुबलौ जगत्त्रयनुतौ नम्रालिरक्षापरौ ||20||

स्कंधौ देवि तवापरौ सुरतरुस्कंधाविवोज्जृंभिता-
वस्मान्नित्यमतंद्रितौ समवतां कामाक्षि दत्वा धनं |
कंठासक्तसमस्तभूषणरुचिव्याप्तौ स्वयं भास्वरौ
लोकाघौघसमस्तनाशनचणावुत्तंभितावुद्द्युती ||21||

ग्रीवा कंबुसमानसंस्थितिरसौ कांत्येंद्रनीलोपमा
पायान्मामनिशं पुराणविनुते कामाक्षि भो तावकी |
नानारत्नविभूषणैः सुरुचिरा सौवर्णकैर्मौक्तिक-
श्रेष्टोद्गुंभितमालया च विमला लावण्यपाथोनिधिः ||22||

देवि त्वद्वदनांबुजं वितनुताच्छ्रेयः परं शाश्वतं |
कामाक्ष्यद्य ममांब पंकजमिदं यत्कांतिलाभे (च्छया) |
तोये नूनमहर्निशं च विमले मंक्त्वा तपस्यत्यलं
तत्सौंदर्यनिधानमग्र्यसुषमं कांतालकालंकृतं ||23||

नेत्रे ते करुणाकटाक्षविशिखैः कामादिनित्यद्विषो
बाह्यामप्यरिसंहतिं मम पराकृत्यावतां नित्यशः |
हे कामाक्षि विशालतामुपगते ह्याकर्ण मिष्टावहे
सातत्येन फलार्थिनां निजगतेः संफुलकं जायते ||24||

भ्रूयुग्मं तव देवि चापलतिकाहंकारनिर्वापणं
कांतं मुग्धविकासचेष्टितमहाभाग्यादिसंसूचकं |
कामाक्ष्यन्वहमेधतां कृतपरिस्पंदं रिपूद्वासने
दीनानिंगितचेष्टितैरवदिदं सुव्यक्तरूपं परं ||25||

नानासूनवितानसौरभपरिग्राहैकलोलालयः
किं मां प्रत्यभियंति नेति कुपितं तप्त्वा तपो दुष्करं |
नासीभूय तवातिसौरभवहं भूत्वाभितः प्रेक्षण-
व्याजेन प्रियकप्रसूनमलिभिः कामाक्षि भात्याश्रितं ||26||

वक्त्रं पातु तवातिसुंदरमिदं कामाक्षि नः सर्वदा
श्रीमत्कुंदसुकुड्मलाग्रदशनश्रेणीप्रभाशोभितं |
पुष्यद्बिंबफलारुणाधरपुटं सद्वीटिकारंजितं
सौभाग्यातिशयाभिधायिहसितश्रीशोभिताशागणं ||27||

संतोषं श्रुतिशष्कुलीयुगमिदं सद्रत्नशोभास्फुर-
त्ताटंकाढ्ययुगेन भास्वररुचा संभूषितं तावकं |
कामाक्ष्यद्य चरीकरीतु विमलज्योतिर्ममानारतं
स्वाभ्याशस्थितगंडभागफलकं सराजयज्ज्योतिषा ||28||

शीर्षं ते शिरसा नमामि सततं कामाक्ष्यहं सुंदरं
सूक्ष्मं तन्मधुपालिनीलकुटिलश्रीकुंतलालंकृतं |
सीमंतं सुविभज्य तत्र विपुलश्रीमन्मणींद्रानित
स्वर्णालंकरणप्रभासुरुचिरं शीर्षण्यभूषायितं ||29||

कामाक्षीश्वरि कोटिसूर्यनिनसद्वज्रादिरत्नांचित-
श्रीमन्मुग्धकिरीटभृद्वितरताद्धन्यं शिरस्तावकं |
संपत्तिं नितरां ममांब मनुजाप्राप्यामिहानारतं
लोकेऽमुत्र भवाभिधं व तिमिरं लूत्वा सदालिश्रितं ||30||

कामाक्षीस्तुतिमन्वहं भुवि नराः शुद्धाश्च ये भक्तितः
शृण्वंत्यत्र पठंति वा स्थिरधियः पण्यामिमामर्थिनः |
दीर्घायुर्धनधान्यसंपदममी विंदंति वाणीं यशः
सौभाग्यं सुतपौत्रजातमधिकख्यातिं मुदं सर्वदा ||31||

कौंडिन्यान्वयसंभूतरामचंद्रार्यसूरिणा |
निर्मिता भाति कामाक्षीस्तुतिरेषा सतां मता ||32||

इति श्रीकामाक्षीस्तुतिः संपूर्णा |